नं० ४९२८ = ४९२९

नाम – "क" सप्तशतीकवचविवरणम् "ख" अर्गलास्तोत्रव्याख्यानम्

कर्त्ता – नीलकण्ठ भट्ट० रङ्ग भट्टपुत्रः

पत्रसंख्या – १५ – आदिखण्डितं ×

विषयः – तन्त्रम्.

क सप्तशती कवच विवरणम् १

ख अर्गलास्तोत्र व्याख्यानम् ३

४४२८ — ४४२९

4428/15

पूर्ण

दु॰ क॰ ॐ श्रीगणेशाय नमः ॐ श्रीदुर्गादेव्यै नमः बंधूकबंधूभवदाननायामायासैवदामीकृत ।
१ प्रोल्लासि धीः सानंदहृद्दारकवंदितांघ्रिर्भासः शिवायावयमेवदासः १ तिथ्येपिधिष्ठेस्व
त्र भिर्योऽमघवलोकस्य पूर्णतये भवाननारताराम्नातवंदेशांकरं गुरुं २ श्रीलक्ष्मीमा
तरं स्मृत्वा नत्वा श्रीपितरं गुरुं काशीनाथश्रीधराख्यौ गुरून्नत्वा यथामति ३ शैवेपना
मकेनैव नीलकंठेन केनचित् सप्तशत्या गद्यटकस्य व्याख्या तन्यते मुदा ४ तत्र तावद्भग
वत्याः परनाया केचिद्विद्वांसो वदंति मायाभगवत्या उपासना शास्त्रेषु श्रूयते तथा च मायाया मिथ्या
त्वान्मिथ्यैव तस्या उपास्त्यघा स्याद्भेद्ये ये यस्य पाप्मने इति नन्वेनेयं भ्रांतिः तापनीये मायाया वा एषा
नारसिंही सर्वमिदं सृजति सर्वमिदं रक्षति सर्वमिदं संहरति तस्मान्मायामेतां शक्तिं वि
द्याद्य एतां मायां शक्तिं वेद स मृत्युं जयति स पाप्मानं तरति सोऽमृतत्वं च गच्छति महतीं
श्रियमश्नुत इति श्रुतौ मायाशक्तिं वेदोपास्ते स मृत्युं जयतीत्यादिवचनेन तथा तेवैस
वी शक्तिरनंतवीर्या विश्वस्य बीजं परमासि माया संमोहितं देवि समस्तमेतदिति स्मृ
तिभिर्विद्वत्सोः प्राकृतजडाया मायाया उपास्यत्वकीर्तनादिति चेन्न देव्यथर्वशिरसि स
र्वे वै देवा देवीमुपतस्थुः कासि त्वं महादेवि साब्रवीदहं ब्रह्मरूपिणी मत्तः प्रकृतिपुरु १

मात्मकं जगदिति तथा भुवनेश्वर्युपनिषदि अथातो वोपनिषदं व्याख्यास्यामो ऽथ एषा नो ब्रह्मत्वं येब्र
ह्मस्वरूपिणीमाप्नोतीति तथा भुवनाधीश्वरी तर्यातीता विश्वविमोहिनीति तथा भावनोपनि
षदि स्वात्मैव ललितेति श्रुतिभिः तथा त्रिपुरातापनीयसुंदरीतापनीयादिषु परे ब्रह्मणि सावदो
मिति गायत्र्या वाच्यार्थ वरेण्य प्रतिपादक ब्रह्मवाचकत्वेन ह्रीकारबीजस्य कथनात् ह्रीकारमंत्रस्य ब्र
ह्मदेवतात्वप्रतिपादकश्रुत्या च तथा कालीतारोपनिषदादिश्रुतिभिस्तथा स्मृतिभिश्च ब्रह्मरूपिण्या
भगवत्या एवोपासना कथनात् तथाहि स्मृतयः सूतसंहितायां पंचमे ऽध्याये अतः संसारनाशाय
साक्षिणीमात्मरूपिणीमाराधयेत्परां शक्तिं प्रपंचोल्लासवर्जितामिति स्कांदे वेदारण्येश्वर माहा
त्म्ये परानंदसच्चिदानंदरूपिणी जगदम्बिका सैवाधिष्ठानरूपास्या जगद्भ्रांतेश्चिदात्मनीति कू
र्मपुराणे द्वादशो ऽध्याये एतत्प्रदर्शितं विप्रा देव्या माहात्म्यमुत्तमं सर्ववेदांतवेदेषु निश्चितं ब्र
ह्मवादिभिः एकं सर्वगतं सूक्ष्मं कूटस्थमचलं ध्रुवं योगिनस्तत्प्रपश्यंति महादेव्याः परं पदमि
ति परात्परतरं तत्त्वं शाश्वतं शिवमच्युतं अनंतप्रकृतौ लीनं देव्यास्तत्परमं पदमिति परात्पर
तरं तत्त्वं शाश्वतं शिवमच्युतं आत्मोपलब्धिविषयं देव्यास्तत्परमं पदमिति तथा हालास्ये।
श्वरमाहात्म्ये मायाबीजार्थप्रस्तावे सत्त्वरूपः सदाकारो [illegible]कारो यमंतस्परः चिदाकारः
चिदाकारः शिवाकारो रेफः सर्वार्थसिद्धिदः आनंदरूपयोरैक्यादीकारः सर्वकामदः बिंदु

डु॰ क॰ नादौ तदंतस्थो भवेत्तां मोदनदावुभौ सच्चिदानंदरूपं तत्प्रोक्तं बीजं मनीषिभिः सच्चिदानंदरूपं य
२ त्परं ब्रह्म तदेव ह्रीति देवीभागवते निर्गुणा सगुणा चेति द्विधा प्रोक्ता मनीषिभिः सगुणा रागि
भिः सेव्या निर्गुणा तु विरागिभिरिति ब्रह्मांडपुराणे ललितोपाख्याने चितिस्तत्पदलक्ष्यार्थो
स्मादेकरसरूपिणीत्यादयो ह्यष्टादशपुराणेषूपपुराणेषु च स्पष्टतयोद्रष्टव्याः ननु तर्हि षो
डशीग्रहणाग्रहणस्त्वयोदितानुदितहोमयोः क्रियाविषयत्वात्तत्र शाखाभेदेन विक
ल्पसंभवेऽपि वस्तुस्वरूपस्यैकविधत्वात्तत्र विकल्पासंभवेन भगवतीस्वरूपस्य मायास्वरू
पत्वप्रतिपादकश्रुत्या सदृ भगवत्या ब्रह्मरूपत्वप्रतिपादकश्रुतेर्विरोध इति चेन्न मायाया
वेदांतेषु मिथ्यात्वान्मिथ्यापदार्थस्याधिष्ठानेकल्पितत्वात्तस्याधिष्ठानसत्तातिरिक्तसत्ता।
भावान्मायायामधिष्ठानसत्तासत्त्वे च मायास्वरूपोपासनायामपि सन्मात्ररूपब्रह्मण
एवोपासनासंभवतीत्याशयेन मायास्वरूपत्वप्रतिपादनेऽपि विरोधाभावात् यथा ब्रह्मण
उपासनायामपि न केवलं ब्रह्मणो ग्रहणं किंतु शक्तिविशिष्टस्यैव शक्तेस्तदतिरेकेण
भावात् केवलस्योपासनासंभवाच्च तथा मायोपासनायामपि न केवलमायाया ग्रहः।
स्थानमस्ति येन केवलाया उपासनं भवेत् किंतु ब्रह्माधिष्ठानयुताया एवावस्थानमि २
ति भगवत्या मायारूपत्वप्रतिपादनेऽपि फलतो ब्रह्मस्वरूपमेव भगवत्याः सिध्यतीति सु

न्योः परस्परं विरोधाभावात् तदुक्तं पावकस्योष्णतेवेयमुष्णांशोरिव दीधितिः चंद्रस्य
चंद्रिकेवेयं शिवस्य सहजा ध्रुवेति तथा स्वपदात्स्वशिरश्छायां यद्वल्लंघितुमीहते पा
दोद्देशे शिरो न स्यात्तथेयं वैंदवी कलेति तथा च यथा शैवो होमे ऽग्निष्टोमे होमो ऽसिद्धप
वमग्निष्टोमीयहोमोऽपि वन्हौ होमोऽसिद्धस्तद्वन्मायाया भगवतीत्वेऽपि ब्रह्मण एव
भगवतीत्वं सिद्धमिति तस्यैवोपासनायां ग्रहणं मायायां मिथ्यात्वप्रतिपादकेषु वाक्ये
षु तु ब्रह्मणो मिथ्यात्वाभावात् केवलमायाया एव ग्रहणं तस्या मिथ्यात्वेऽपि तदधिष्ठान
स्य सत्यत्वात् उपासकस्योपास्यमायापदार्थान्तर्गतस्य ब्रह्मांशस्य मोक्षदशायामन
स्तत्वान्न मुक्तावुपास्यस्वरूपत्यागः अत एवान्तर्यामिब्राह्मणे पृथिव्यादिमायान्त
र्गतानां पदार्थानां यः पृथिव्यां तिष्ठन् पृथिवीं न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो य
मयतीत्यादिनान्तर्यामिचेतनस्यैवेनैव [?] देवतात्वमुपवर्णितं तथा च सर्वं खल्विदं ब्रह्मे
ति श्रुतिरपि अनन्यदृष्टीनां भगवतीत्वेन सर्वमभिप्रेत्य सूतसंहितायामुक्तं चिन्मात्राश्रय
मायायाः शक्त्याकारे द्विजोत्तमाः अनुप्रविष्टा या संवित् निर्विकल्पा स्वयंप्रभा सदाका
रा सदानंदा संसारोच्छेदकारिणी सा शिवा परमा देवी शिवाभिन्ना शिवंकरीति यद्वा
भगवतीस्वरूपप्रतिपादकवाक्येषु ये माया शक्तिकत्वादि [illegible] लक्षणया माया

दु.क.
२
3

विशिष्टशक्तिविशिष्टकलाविशिष्टब्रह्मबोधकात्वं तथा च मायाविशिष्टं शक्तिविशिष्टं क
लाविशिष्टं यद्ब्रह्म तद्भगवतीपदवाच्यमिति फलितोर्थः एतेन तत्त्वधारूपेण संस्थिता नि
द्रारूपेण भ्रांतिरूपेण स्तुति रूपेणेत्यादिकेवलशक्तिवाचकपदानि व्याख्यातानि तैरप्य
देतत्तच्छक्तिविशिष्टब्रह्मण एव सर्वत्र ग्रहणात् अयमेवार्थः कालोत्तरे उक्तः तथा च।
कालोत्तरे शिवं प्रति देवीप्रश्नवाक्यं भगवन् देवदेवेश मिथ्या मायेति विश्रुता तस्याः क
थमुपास्यत्वं भवेन्मत्स्यावनन्नयात् अज्ञानं जायते क्वापि मिथ्यावस्तुनि कुत्रचित् देव्या
उपासनाचेयं श्रुता मायाश्रिता प्रभो संशयं छिंधि देवेश प्रारब्धं संवदमे विभो इति श्रुत्वा
वचो देव्या भगवांश्चंद्रशेखरः उवाच वचनं दिव्यं लोकानां चैव हितप्रदं नाहं त्वामुपमा
याया उपास्यत्वं ब्रुवे क्वचित् मायाधिष्ठानचैतन्यमुपास्यत्वेन कीर्तितं मायाशक्त्यादि
शब्दास्तेविशिष्टस्यैव लक्षकाः तस्मान्मायादिशब्दैस्तु ब्रह्मैवोपास्यमुच्यत इति अ
त्र पूर्वार्द्धेन मायाधिष्ठानचैतन्यमित्यनेन प्रथम एतदुक्तो मायाशक्त्यादीत्यनेनोत्तरार्द्धे
न द्वितीयः पक्ष उपपादितः एतदभिप्रायेणैव ब्रह्मांडपुराणे मायावाचकस्यैव ह्रींका
रस्य मायाविशिष्टब्रह्मवाचकत्वमुक्तं शक्त्यक्षराणि शेषाणि ह्रींकार उभयात्मक इति ६
उभयात्मकः शिवशक्त्यात्मक इत्यर्थः किं च मायायाः केवलाया उपास्यत्वं वदन्वादी।

श्रीतः प्रश्नः जडायाउपासनायास्तत्तद्देवतास्वरूपाणां प्राणेन्द्रियमनआत्मजीवादिमत्त्वैक
पेभवेत् द्विविधं हि भगवतीरूपं स्थूलं सूक्ष्मं च तत्र सूक्ष्मं मुख्यं स्थूलं तत्तदुपासकानां
दर्शनादिव्यवहारार्थं तत्तदुपासकैरुपासितं सूक्ष्मरूपमेव तत्स्थूलं रूपं गृह्णातीति तत्रैवं
सति सूक्ष्मरूपेणैव तन्मात्रानन्तप्रवेशेन तद्बुद्धीते स्थूलरूपेपि चैतन्यासानन्तप्रवेशेन तत्तद्देव।
तानां प्राणेन संभाषणादिव्यवहारोच्छेदप्रसङ्गात्तस्मादनिच्छयापि चैतन्यविशिष्टाया
एव तत्तच्छक्तेरुपास्यत्वं वक्तव्यमिति तन्वेवं चेत्किमर्थं मायादिशब्दैर्व्यवहारो भगवत्याः
शास्त्रे क्रियते लक्षणादिदोषाभावाय स्वरूपप्रतिपत्तये ब्रह्मादिशब्दैरेव कुतो न व्यवहारः कि
यत इति चेच्छृणु चतुर्व्यूहात्मकं हि ब्रह्मणो रूपं विराड्हिरण्यगर्भाव्याकृतब्रह्मरूपं
तत्र देव्युपासनायां सूक्ष्मं तद्गतं स्वकस्य पदार्थस्येति शं कार्यां विराड्हिरण्यगर्भाव्याकृ
तानां तदधिष्ठातॄणां ब्रह्मविष्णुरुद्राणां च मैत्रायणीयच्छ्रुतौ पञ्चकेकगुणमयत्वेन कीर्ति
तानां गुणत्रयसाम्यावस्थाया मायायाः प्रकृत्यादिशब्दवाच्यत्वेन तस्याश्चतुरीयब्रह्मा।
श्रितत्वेन तदेव मायाविशिष्टं तुरीयं ब्रह्मैव भगवत्युपासनायां ग्राह्यमिति बुद्धदर्थप्र
काशनार्थं तस्या मायादिशब्दैर्व्यवहारस्य करणात् तथा च मैत्रायणीश्रुतिः तमो वा
इदमेकमग्र आसीत्तत्परेस्यात्तत्परेणेरितं विषमत्वं प्रयात्येतद्वै रजस्तद्रजः खल्वीरितं वि

दु.क.
४

परमतत्त्वं प्रयाति तद्देवतत्त्वस्वरूपमिति अनेन वाक्येन मायायाश्चिन्मयशक्तितायाः परेण ब्रह्मणा
नित्यसंबंधप्रदर्शनेन जगत्कारणरूपं साम्यावस्थात्मकं प्रदर्शितं नप्रसन्न्यथा तमःप्रेरक
त्वं साम्यावस्थामायोपाधिं विना निर्गुणस्य परमात्मनः संभवति अत एव तस्यैतान्नवोध्य
यो ह खलु वावास्य तामसोंऽशः सोऽयं रुद्रो यो ह खलु वावास्य राजसोंऽशः सो ब्रह्मा
यो ह खलु वावास्य सात्त्विकोंऽशः स विष्णुरिति निर्गुणत्रयोपाधितं ब्रह्मविष्णुरुद्राणां प्रति
पादितं तथा पुराणादिषु च सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहा
स्य धत्ते स्थित्यादये हरिविरिंचिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्त्वतनोर्नृणां स्युरि
त्यादिसर्वपुराणेषु ब्रह्मविष्णुरुद्राणामेकैकगुणवत्त्वमेव प्रतिपादितं न हि मायायाः प्र
कृतिगुणत्रयादिणा ह्रवाच्यं वस्तु ब्रह्मातिरिक्तात्मकं भवति येन मायादिशब्दैरूपास्यत्वं।
स्तु मायाविशिष्टब्रह्मरूपमेवेति तैः शब्दैरूपास्यवस्तु प्रतिपादितं मायाविशिष्टब्र
ह्मरूपमेव भगवतीरूपमुपास्यं भवेदिति बोधनार्थमेव मायादिशब्दैर्भगवत्या उपा।
सनकथनमिति ननु तर्हि तत्त्ववेत्तृभिः शाक्तैरनंतवीर्येत्यत्रादिमायाशब्दैर्ब्रह्मविशिष्टमा
यावाचकः स्यादिति चेत् प्राप्तिः तत्र केवलायाः मायायाः प्रवृत्तिविवादिनत्वादिति चेन्न तत्प्रसक्ता
भिः सर्वत्र मायाशब्देन मायाविशिष्टब्रह्मणैव सर्वत्र ग्रहणमिति शपथः क्रियते येनातिप्रसं ४

गः साक्षिकं तत्क्षचित्तेवं पिष्टाद्वूहमभिव्याहारे केवलमायाया ग्रहणं यथात्रैव तथा नाशप्र
कारणे केवलमायाया एव ग्रहणं तथा स्कान्दे ब्रह्मखण्डेऽपि मान्मायाशक्तिसंक्षुब्धं जगत्सर्वं
चराचरं सापि मत्तः पृथक् विद्या नास्त्येव परमार्थत इत्यादौ केवलमायाया ग्रहणं उपा
सनाखण्डे तत्तद्दिशि पद्ब्रह्मणो ग्रहणमिति नियमादिदं तपथा यथ मूढनात्त्रेयं तथा
यथमूढनात्त्रेयं तथा च तत्रैव स्वकीयशक्तिरित्यादावधिष्ठानब्रह्मरूपिण्या तत्र स्वकी
वीयामायाशक्तिरखिलतद्रूपिणी प्रसीदतु यथैः ब्रह्मणः सर्वाधिष्ठानत्वेन सर्वरूपत्वात् तेन
च ब्रह्मरूपत्वमेव भगवत्याः प्रतिपादितं एवमन्यत्रापि पूर्वं यद्यपि ब्रह्मणो जगत्कारणक्षोभ
यात्मकत्वात् क्वचिन्मायोपसर्जनं ब्रह्मण उपासनं तत्रशक्तिः सहायभूता इदं च मतं शिव
पुराणादिषु स्पष्टं यस्मात्सहतया देवं ये दिपश्यन्ति योषिद्वै तेषां शाश्वतीकाष्ठा नेतरे
तरेषां कदाचनेत्यादिवचननिचयात् क्वचिच्च ब्रह्मोपसर्जनमायाया उपासनं तत्र भगव
ती विषये ब्रह्मोपसर्जनमायाया एवोपासनमिति दर्शयितं मायाशक्त्यादिशब्दैः [illegible]
भगवत्या व्यवहारः क्रियत इति इदं च मतं सर्वतन्त्राभिमतं पुराणाभिमतं च शिवेन संहि
तां देवीं भावयेद्भुवनेश्वरीमिति भुवनेश्वरीपारिजातादिवचननिचयात् तदुक्तं
कूर्मपुराणे ब्रह्मस्वाद्यनादिसंसिद्धमैश्वर्यमतुलं मम तत्संपादने तैषामाहं देणपरमा

ङ•क• त्मनेत्यादीनि वचनानि देवीभागवतादिसर्वपुराणेषु द्रष्टव्यानि । उभयपदेऽपि ब्रह्मणस्त्रिविध
५ प्रा उपासनाया मागत । एवेति न भक्तानुपाद्यस्वरूपानन्तयितरूपं द्रूषणं तत्राद्य इयतेति
इत्थं भगवदुपासनायां स्वरूपेति एतेनैव ब्रह्मविष्णुरुद्रशक्त्युपासनात्मकस्योपासनाविर
5 हेत्यस्य विचारः क्रियते । तत्र सर्वं खल्विदं ब्रह्मेति सामानाधिकरण्येन सर्वपदार्थमात्रस्य
ब्रह्मरूपत्वेऽपि भक्तानां चेतसोऽवलंबाय परमेश्वरेण मलिनमुद्दिश्य उद्गतमावि
र्भूतयः स्फुटितारतम्येन कल्पिताः । ताश्च गीतादिशास्त्रेषु विभूत्यध्याये ... दो गयादिषु
च प्राणो ब्रह्म आदित्यो ब्रह्म मनो ब्रह्मेत्यादिवाक्यैः प्रदर्शिताः । तत्र च सर्वविभूतिषु ब्रह्म
णः समानत्वेनावस्थानेऽपि यथा पाषाणकृपादर्पणादिषु स्फुटितारतम्येन प्रतिबिंबफल
स्यापि तारतम्यं एवं विभूतिषु च स्फुटितारतम्येनैव ब्रह्मणः प्रसादकरणतारतम्यं प्रतिबिं
बफलनतारतम्यं चेति । याभिर्याभिर्विभूतिभिर्यथा यथा प्रतिबिंबफलनतारतम्यं प्रसा
दकरणतारतम्यं च भवति तथा तथा तस्या विभूतेः उत्कृष्टतमत्वं उत्कृष्टतरत्वं उत्कृष्टत्वमव
मित्यादिव्यवहारः सर्वशास्त्रप्रसिद्धो निर्विवादस्तथा च सति ब्रह्मविष्णुरुद्राणामेकैकग
णोपाधितेनैकैकगुणोपेतया साम्यावस्थायाः तन्मूलगुणमूलभूताया आधिक्येनैकैकगु
णोपाधिब्रह्मविष्णुरुद्रापेक्षया साम्यावस्थात्मकत्वेन तदभेदात्तेषामपि तदात्मकत्वकथा । ५

नमित्याश्रयात् अत एव तापनीये नृसिंहस्य सतोपि हितस्य विलोरवतारत्वे सर्वश्रुतिपुराणनिश्चिते
सत्यपि तास्यावस्थात्मकत्वेन वर्णनं संगच्छते तस्मान्मायाशक्त्याद्यब्रह्मरूपभवावस्थोपासनेनैव वस्तु
त्सो सर्वोत्कृष्टा चेति सैव सर्वकामार्थिभिर्मुमुक्षुभिश्चोत्कृष्टत्वरूपासनेनैव बुभुक्षाश्रयाणि घेत्स
र्थोत्तमत्वमपि पुराणेतरवचनैः स्पष्टमुपपाद्यते तदुक्तं शिवपुराणे ब्रह्मविद्या जगद्धात्री सर्वेषां
जननी तथा यया सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरं सैव सेव्या उपास्या च नान्या हि देवतान्तर
मिति तथा तंत्रेषु एवं यः पूजयेत् भक्त्या प्रत्यहं परमेश्वरीं भुक्त्वा भोगान्यथाकामं देवीसायुज्य
माप्नुयात् यो न पूजयते नित्यं चण्डिकां भक्तवत्सलां भस्मीकृत्यास्य पुण्यानि निर्दहेत् परमेश्व
रीति अनेन वचनेन भगवदुपासनायाः संपादिकर्मवत्त्रित्वं नित्यपादोच्चारणेन स्पष्टमेव बो
धितं स्वीकृतं चैतदस्माभिर्देवीभागवतटीकायां तथा पुराणांतरे आराध्या परमा शक्तिः सर्वै
रपि सुरासुरैः नातः परतरं किंचिदधिकं भुवनत्रये इति तथा ओंकाररूपिणीरूपेण गायत्री मा
तरं तथा पितरो यो न जानाति स विप्रस्त्वपरेतज इति तथा कालत्रयेपि धिक् धिक् धिक् धिक्
घतज्जन्मयो न पूजयते शिवां जननीं सर्वजगतः करुणारससागरामित्यादिपुराणेषु तंत्रेषु च
बहूनि वचनानि दृष्टव्यानि विस्तरभयान्नोक्तानि शक्तितत्त्वविमर्शिन्यां दृष्टव्यं इत्थं शक्तितत्त्वस्य
सर्वोत्कृष्टत्वस्य सर्वैरुपास्यस्योपासनाप्रकारास्त्वधिकारिभेदेनानेकविधाः पूजास्तोत्रमंत्रजपध्या

दु॰क॰ नलयरूपाः तदुक्तं भुवनेश्वरीसंहितायां पूजाकोटिसमं स्तोत्रं स्तोत्रकोटिसमो जपः जपकोटिसमं
६ ध्यानं ध्यानकोटिसमो लय इति पूजा च चतुःषष्टिसंख्योपचारषोडशोपचारपंचोपचारभेदेन त्रिवि।
धा मंत्राश्च मायाबीजादयो बीजरूपा गायत्र्यादयो ऋग्रूपास्तदतिरिक्ताश्च नवार्णप्रभृतयो वैदिका
6 देव्यथर्वशिरसि भुवनेश्वरीतापनीयादिषु प्रसिद्धाः तैत्तिरीयशाखायां च श्रीश्च ते लक्ष्मीश्च पत्न्यावि
ति कंठरवेणैवोपास्या स्तोत्राणि चतुःषष्टितंत्रेषु प्रसिद्धान्येव ध्यानलयादयस्तु तंत्रेषु योगशास्त्रेषु
श्वेताश्वतराद्युपनिषत्सु च ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिवा
क्यैः प्रतिपादिताः स्तोत्राणि च सप्तशत्यादीनि मार्कंडेयपुराणादिषु प्रसिद्धानि तत्र स्तोत्रेषु स्तो
त्रद्वयं मुख्यं सप्तशतीरूपं कूर्मपुराणान्तर्गतं देवीसहस्रनामाख्यं च तंत्रेषु बहुधैतयोर्मुख्यत्वप्र
तिपादनात् स्तोत्रद्वयेपि सप्तशत्याख्यमेव मुख्यं सर्वेषां श्लोकानां मंत्ररूपत्वात् चतुःषष्टितंत्रेष्व
पि तस्यैव मुख्यत्वेन प्रतिपादितत्वाच्च उक्तं च वेदागमे निर्विशेषपरा मंत्राः सविशेषपरा मंत्राः स
विशेषपराश्च ये प्रत्यग्यायोतिगूढास्ते तेनेयं सर्वतः परेति रुद्रयामले च अतिगुप्ततमं देव्या
माहात्म्यं सर्वसिद्धिदं वाक्यैरर्थैश्च पद्यैश्च सप्तशत्यात्मकं शुभं सविशेषपरं साक्षान्निर्विशेषकमदि
माश्रयं तात्पर्यगत्या तत्कृत्स्नं निर्विशेषविदाश्रयमिति तस्य च सप्तशतीस्तोत्रस्य कवचादित्रयं ६
च तंत्रोक्तमस्यमेवांगं भवति वचनप्रामाण्यात् तदुक्तं कात्यायनीतंत्रे अंगहीनो यथा देही सर्वकर्मसु

हृन्नमः अंगषट्कविहीना तु तथा सप्तशती स्तुतिः तस्मादेतत्पठित्वैव जपेत्सप्तशतीं पु
रो अन्यथा शापमाप्नोति हानिं चैव पदे रावणाद्याः स्तोत्रमेतदंगहीनं निषेविरे हता राम
णेन यस्मादंगहीनं पठेन्न तु इति तद्यथामति व्याख्यायते तत्र कवचं श्रेष्ठं ब्रह्मणा प्रतिप्रा
र्थं करोति मार्कण्डेयः ॥ ॥

दुगा॰ यद्गुह्यमिति लोके यत्परमम्गुह्यं गोप्यं रहस्यमस्ति तन्मे ब्रूहीति किंभूतं रूपं तेनाह सर्वर
७ क्षाकरं येन सर्वेषामपि रक्षा भवति नृणां पामरप्रभृतीनामपि तादृशमित्यर्थः अन्यत्र समा
धिकारिणामेव रक्षकं न सर्वेषामित्यर्थः ननु सन्त्यन्यानि कवचानि लोके इति चेत्सत्यं सन्ति त
थापि यद्भवता कस्यचित्कस्यापि नाख्यातं निधिवद्गोप्यं यस्यापि तन्नास्ति तदित्यर्थः तेन च निःसंश
यमेव रक्षणं स्यादिति भावः अन्यथा निधिवद्गोप्यानस्य रक्षणं निरर्थकं स्यादिति ननु कि

श्रीमार्कण्डेय उवाच यद्गुह्यं परमं लोके सर्वरक्षाकरं नृणाम् यन्न कस्यचिदाख्या
तं तन्मे ब्रूहि पितामह १ ब्रह्मोवाच अस्ति गुह्यतमं विप्र सर्वभूतोपकारकम्
देव्यास्तु कवचं पुण्यं तच्छृणुष्व महामुने २

मित्याह किंभूतं वस्तु मया देयमिति चेत् तत्राह
हे पितामह त्वमेतत् न ति रक्षणार्थं पितामहेनावश्यं देयमित्यर्थः १ उत्तरमाह ब्रह्मोवाच अ
स्ति गुह्यतमं विप्रेति हे विप्र त्वया यत्पृष्टं तादृशं देव्यास्तु देव्याः पवित्रं कवचं पुण्यमेकं निधिवद्गोप्या।
स्यापि तन्नास्ति तन्महामुने शृणुष्व सर्वभूतोपकारार्थं प्रवृत्तत्वात् महामुने इति संबोधनम् । ७
२ ॥ २ ॥

परं तस्या देवी नवमूर्त्यात्मिकाऽध्येयेत्यभिप्रायेण तासां मूर्तीनां नामान्याह प्रथमं शैलपुत्री
ति नाम तज्जानेर्जातेन तद्वाच्याकारस्य प्रसिद्धत्वाद्देवत्वानं भविष्यतीति भावः सर्वोत्तरैश्वर्यवत्य
पि भगवती शैलेन भक्तेनातितपश्चर्यया प्रार्थिता सती कारुण्यवशादतिनीचमपि पुत्रीत्व
स्वीकृतवती तस्माद्भक्तवात्सल्यं किं वर्णनीयं भगवत्या इति कूर्मपुराणे प्रसिद्धं ब्रह्मचा
रिणीति ब्रह्मचारिणीति ब्रह्म सच्चिदानंदरूपं तच्चारयितुं प्रापयितुं शीलमस्याः ब्रह्म
चारिणी ब्रह्मरूपप्रदेत्यर्थः चंद्रघंटेति चंद्रो हस्तगतायां यस्याः सा चंद्रघंटा वा चंद्रवत्निर्मला वा घंटाय

प्रथमं शैलपुत्रीति द्वितीयं ब्रह्मचारिणी तृतीयं चंद्रघंटेति कूष्मांडेति चतुर्थकं ३

स्या इत्यर्थः यद्वा आह्लादकारिणी देवी चंद्रघंटेति कीर्तितेति रहस्यागमोक्ते चंद्रं घंटयति प्र
तिवादितया भाषते स्वस्याह्लादकारित्वाभिमानेनेति चंद्रघंटा चंद्रापेक्षयाप्यतिशयेन लावण्यवती
त्यर्थः घटघंटेति दंडकपाटितस्य चुरादौ घटि धातोर्भाषार्थस्य प्रयोगाद्युचितरूपं चंद्रघंटस्य घंटा च
द्रघंटा कूष्मांडेति कुत्सित ऊष्मा संतापस्त्रयरूपो यस्मिन् संसारे स कूष्मा स एव अंडं मांसपे
श्यामदररूपायां यस्याः त्रिविधतापयुक्तसंसारभक्षणकर्त्रीत्यर्थः अंडः पेश्यां च मुष्के
चेति मेदिनी ३ ॥ ॥ ॥ ३ ३ ॥ ॥

दु॰क॰ ८ स्कंदमातेति सनत्कुमारस्य भगवतीवीर्याद् उद्भूतस्य स्कंद इति संज्ञा भगवान् सनत्कुमारस्तं स्कंद
इत्याचक्षत इति छांदोग्यश्रुतेः तथा च स्मातिभिर्वियदुदरे जन्माभिलषणीयमिति स्कंदस्य
कात्यायनीति देवकार्यार्थं कात्यायनाश्रमे आविर्भूता तेन कन्यात्वेन स्वीकृतेति कात्यायनी।
ति नाम भगवत्याः अस्या निरंतरं कुमारीत्वेन पत्यनधीनतया स्वतंत्रत्वं कालरात्रीति सर्वमार
कस्य कालस्यापि रात्रिर्नाशिकेत्यर्थः प्रलये कालस्यापि नाशनात् कृदिकारादक्तिन इति।

पंचमं स्कंदमातेति षष्ठं कात्यायनीति च सप्तमं कालरात्रीति महागौरीति चाष्टमं ४
नवमं सिद्धिदा प्रोक्ता नवदुर्गाः प्रकीर्तिताः उक्तान्येतानि नामानि ब्रह्मणैव महा।
त्मना ५

ङीप् महागौरीति इयं च महामानिनी नर्मोक्त्या शिवेन कालीत्युक्ते तपसा गौरवर्णस्य संपादि
तत्वात् कालीपुराणे स्पष्टमेतत् । सिद्धिदेति मोक्षदेत्यर्थः इतीति शेषः सिद्धिदेति नवममित्य
न्वयः नवदुर्गा इति योगिनः कायव्यूहवदेकस्या एव दुर्गाया एते नव भेदा ये प्रागुक्ता ध्येयत्वेन
प्रोक्तास्ते मया कीर्तिता इत्यर्थः अत एव देव्याः कवचमित्येकवचनं संगच्छते नाम्नां स्वका।
ल्पितत्वं प्रोक्ताद् उदासार्थमाह उक्तान्येतानीति महात्मना सर्वज्ञेन ब्रह्मणैव वेदेनैवैतान्युक्ता। ८

श्यं कवचपाठे ध्येयं देवतास्वरूपं प्रदर्श्य तत्फलेष्वविप्रवासो नैव कर्तव्य इति केचित् कल्प्या
येनाह अग्निनेति योऽग्निना दह्यमानो रणे शत्रुमध्ये च गतः सन् शरणं गत इति शेषः अथवा
विषमे दुर्गमे चाति संकटे भयार्ता भयपीडिताः सन्तः शरणं गताः ६ तेषां तत्स्वरूपभक्तिरहिते

अग्निना दह्यमानस्तु शत्रुमध्ये गतो रणे विषमे दुर्गमे चैव भयार्ताः श
रणं गताः ६ न तेषां जायते किंचिदशुभं रणसंकटे नापदं तस्य पश्या
मि शोकदुःखभयं न हि ७ यैस्तु भक्त्या स्मृता नूनं तेषां वृद्धिः प्रजा
यते प्रेतसंस्था तु चामुण्डा वाराही महिषासना ८ ऐन्द्री गजसमारू
ढा वैष्णवी गरुडासना माहेश्वरी वृषारूढा कौमारी शिखिवाहना ९
ब्राह्मी हंससमारूढा सर्वाभरणभूषिता नानाभरणशोभाढ्या नाना
नानारत्नोपशोभिताः १०

न स्मरणमात्रेणापि तज्जन्यं भयादिकं न भवतीत्याह न तेषामिति ७ यैस्तु भक्त्या स्मृता भ
वन्ति तेषां पूर्वोक्तं फलं वृद्धिः धर्मार्थकाममोक्षाणां च भवतीत्यत्र किं वक्तव्यमित्याह यैरि
ति ८ इदानीं देव्या अतिवात्सल्यं दर्शयति भक्त्युत्पादनार्थं प्रेतसंस्थेति तत्र सप्तमातृणां वा

वक्ष्यमाणादेव्यः दृष्टव्येत इति सप्तमातृभिन्ना याश्च देव्यस्ता अपि भक्तरक्षणार्थं क्रोधसमाकु
लाः रथमारूढा ज्ञात्वा कवचेन रथानारूढा दृष्टव्ये ते अर्थात् देवादिभिरिति तासामायुधान्या
ह शंखमिति १२ दैत्यानिति ताः सप्तमातरश्च पूर्वं शंखं चक्रमित्यादिश्लोकोक्तानीत्यायुधा
नि धारयन्ति किमर्थं दैत्यानां देहनाशार्थं भक्तानामभयार्थं देवहितार्थं चेत्यर्थः अयं भावः अप्रा
र्थिता अपि पतमाहत्यो देवताः जगद्रक्षणे वत्सलतयैव प्रवृत्ता मातृवत् ताः कृतानमद

दृष्टव्ये ते रथमारूढा देव्याः क्रोधसमाकुलाः शंखं चक्रं गदां शक्तिं हलं च मुस
लायुधं ११ खेटकं तोमरं चैव परशुं पाशमेव च कुन्तायुधं त्रिशूलं च शार्ङ्गमायु
धमुत्तमम् १२ दैत्यानां देहनाशाय भक्तानामभयाय च धारयन्त्यायुधानी
त्थं देवानां च हिताय वै १३ महाबले महोत्साहे महाभयविनाशिनि त्राहि
मां देवि दुःप्रेक्ष्ये शत्रूणां भयवर्द्धिनि १४

भाग्येन स्वरक्षणार्थं प्रार्थ्यत इति १२
कवचपाठस्यादाविमं प्रार्थनामंत्रं पठित्वा पश्चात् कवचं पठनीयमित्यभिप्रायेणाह म
हाबले इति महद्बलं मायाशक्तिरूपं यस्याः महानुत्साहो जगद्रक्षणे यस्याः म
हाभयं मत्स्यरूपं तस्य त्राणदानेन नाशिनी दुःप्रेक्ष्ये दुर्दर्शनीये न सहद्रष्टुं शक्यते रूपमस्ये
ति श्रुतेः शत्रूणां कामक्रोधादिकानाम् १४ ॥ १४

प्राच्यामिति प्राच्यां दिशि स्थितां ऐन्द्रीशक्तिर्मां रक्षत्वित्यर्थः प्राच्यां स्थितं मामिति वा एव
मग्रेऽपि शक्तिशक्तिमतोरभेदादग्निरूपा देवताग्निशक्तिरित्यर्थः अवत्विति रक्ष
हन्तिरादौ वरानाद्धेति सर्वत्राह्योयमः आर्षः प्रयोगः तस्य शक्तिर्वाराही अरुणे तानृष्टीप्र
यशक्तिरित्यर्थः दण्डादिकालप्रकरणात् सत्त्वमात्रं तत्र गतावा वाराही हे वाराहि दक्षि
णे देशे स्थितां मां रक्षेत्यर्थः स्थितं मामिति वा खड्गधारिणी निर्ऋतिशक्तिरित्यर्थः १५

प्राच्यां रक्षतु मामैन्द्री आग्नेय्यामग्निदेवता दक्षिणे रक्षतु वाराही नैरृत्यां खड्ग
धारिणी १५ प्रतीच्यां वारुणी रक्षेद्वायव्यां मृगवाहिनी रक्षेदुदीच्यां कौमा
री ईशान्यां शूलधारिणी १६ ॥

रक्षत्वित्यस्य मध्ये विच्छेदादध्याहारः कर्त्तव्यः मृगवाहिनी वायुदेवताया मृगवाहनत्वा
द्वायुशक्तिरित्यर्थः रक्षेदित्यत्र तिः कौमारी कुत्सितो मारो मदो यस्य सः कुमारः कुबेरः
तस्येयं शक्तिः कौमारी दिक्पालप्रकरणात् यद्यपि कौबेरीरक्षणस्थानमग्रे वक्ष्यमाण
मस्ति तथाप्येकस्यापवक्ष्यानदयरक्तकत्वेवाधकाभावः सत्त्वमात्रं तत्र गता वा शूलधारिणी
ईशानशक्तिरित्यर्थः १५ ॥ १६ ॥

ङ॰क॰ ब्रह्मणोनीति ब्रह्मणमानयमिजीवयतीतिकर्मण्यण् हे ब्रह्माणि क ऊर्ध्वस्थिताभगवतीमेमांरक्षेदित्य
१० र्थः मेरुऊर्ध्वमार्गमिनिर्वाणवमिति दशादिग्पालदेवतावृदेवमेइतिशिवः मेमत्संबंधिनी दशादिशा
श्चामण्डारक्षेदित्यर्थः दशादिक्षुस्थिताश्चामुण्डामांरक्षेदितिपर्यवसितोऽर्थः अन्यथाकेवलादि
ग्गारक्षणेप्रयोजनाभावः ८ जयाशक्तिःस्यात्तनिष्ठत आर्षःप्रयोगःमत्संरक्षणार्थं शिखा।

ऊर्ध्वब्रह्माणिमेरक्षेदधस्तादैस्वीतथा एवंदशदिशोरक्षेच्चामुंडाशववाहना ८
जयामेचाग्रतःस्यात्तुविजयास्यात्तुपृष्ठतः अजितावामपार्श्वेतुदक्षिणेचापराजिता
शिखामुद्योतिनीरक्षेदुमामूर्ध्निव्यवस्थिता मालाधरीललाटेचभ्रुवौरक्षेद्यशस्विनी १९ त्रिनेत्राचभ्रुवोर्मध्येयमघंटाचनासिके शंखिनीचक्षुषोर्मध्येश्रोत्रयोर्द्वारवासिनी २० कपोलौकालिकारक्षेत्कर्णमूलेतुशंकरी नासिकायांसुगंधाचउत्तरोष्ठेचचर्चिका २१

मिति उद्योतिनीनामिकादेवीममशिखांसंस्थितासती मह्ब्रिक्षांरक्षेदितिप्रत्यवयवंसर्वत्रयोजनीयं उमामूर्ध्निव्यवस्थितासतीमूर्धानंरक्षेदित्य
र्थः एवंसर्वत्रयथायोग्यमप्याहार्यं १९ नासिकेनासिकापुटेइत्यर्थः उत्तरत्रनासिकाप्र

१० श्राद्वेननासिकादण्डइति २० २१

अपरे अपरोष्ठ इत्यर्थः २२ कंठस्य बहिर्भागो बहिःकंठः नलिका कंठनाले २४ स्कंधमार
भ्य कूर्परपर्यंतो भागो बाहुः हस्तादारभ्याङ्गुलिपर्यंतो हस्तः २५ कक्षाविति सप्तम्यंतपाठः

घंटिकां चित्रघंटा च महामाया च तालुके कामाक्षी चिबुकं रक्षेद्वाचं मे सर्वमंगला २३
ग्रीवायां भद्रकाली च पृष्ठवंशे धनुर्धरी नीलग्रीवा बहिःकंठे नलिकां नलकूबरी २४
खड्गधारिण्युभौ स्कंधौ बाहू मे वज्रधारिणी हस्तयोर्दंडिनी रक्षेदंबिका चांगुली
षु च २५ नखाञ्छूलेश्वरी रक्षेत्कक्षौ रक्षेन्नलेश्वरी स्तनौ रक्षेन्महादेवी मनःशो
कविनाशिनी २६ हृदयं ललिता देवी उदरे शूलधारिणी नाभिं च कामि
नी रक्षेद्गुह्यं गुह्येश्वरी तथा २७ भूतनाथा च मेढ्रं च गुदं महिषवाहिनी कट्यां
भगवती रक्षेज्जानुनी विंध्यवासिनी २८ जंघे महाबला प्रोक्ता जानुमध्ये विना
यकी गुल्फयोर्नारसिंही च पादपृष्ठेऽमितौजसी २९ ॥

प्राचीनसंमतः २६ २७ जानुनी विंध्यवासिनीति पाठः २८ प्रोक्तागमादिष्वास्वेषु या
महाबलाख्येत्यर्थः २९ ॥ २९ ॥ २९ ॥ २९ २९ ॥ २९

ड॰क॰
११

पादाधइति भिन्नं पदं तलवासिनी पातालतलवासिनीत्यर्थः यद्यपि नखोद्भुलेश्वरी रदेति दि
त्रनखरदनाणामुक्तं तथापि यथैकस्याश्रपि देवतायाः स्थानद्वयरदकत्वेन विरुध्यते तथैव
देवताद्वयस्यैकस्थाननिरूपितरदकत्वे बाधकाभावइत्यभिप्रायेण नखानूदंष्ट्राः कराली
चेत्युक्तं श्रोत्राणीति श्रमृथानोद्र्वेऽन नासिकस्यकोतिदीर्घेः पद्मकोशेप पद्मं हृदयादिरूप
मेवकोशेण वासस्यानेयस्य श्वासस्यतामिनानेस्थितासतीनं रदातितियावदित्निकेचित्

पादांगुलीः स्त्रीपदीच पादाधस्तलवासिनी नखानूदंष्ट्राः कराली चक्षुषां श्वेतोर्ध्वके
शिनी १० रोमकूपाणि कौबेरी मर्चवागीश्वरी तथा रक्तमज्ज्वावसामांसान्यस्थिमेदां
सि पार्वती ११ श्रोत्राणि कालरात्रिश्च पित्तं च मकुटेश्वरी पद्मावती पद्मकोशे कफे चू
डामणिस्तथा १२ ज्वालामुखी नखज्वाला मभेद्या सर्वसन्धिषु मुक्तं ब्रह्माणि मे रक्षे ।

अग्रे श्राणानां रक्षणकथनात्पद्मकोशशब्देनात्र हृदयं वाप्यधोमुखेमिति स्मृत्युक्तं हृदयमेव
पद्मकोशशब्देन ग्राह्यमित्यपरे ११ चूडामणिनाम्नी देवता रक्षास्तु वपेऽप्रसिद्धा १२ नखज्वा
लानखेनिर्वृतेजः अभेद्या नाम्नी देवता सर्वसन्धिषु स्थिता सती सर्वसन्धीनूरक्षेदित्यर्थः हे ११
ब्रह्माणि भवती मेमुक्तं रक्षेदित्यर्थः १३ १३ ॥

हे धर्मचारिणि अवतमित्यथाहारः रक्षेति मध्यमपुरुषात् २४ हे इंद्राणि भवती त्वथाहारः २५
रक्षाहीनमिति यत् स्थानं रक्षया हीनं भवति कुत इति चेत् कवचेन तत्वर्जितं कवचेन तत्स्थानं सो
हो न कृतोऽतः तत्सर्वं रक्ष मे देवि यतस्त्वं जयंती सर्वा कुहा पापनाशिनी भवसि २७ अथ
पितामहः फलस्तुतिं वक्तुमधिकारिणं प्रथमम पदिष्टानि पदमेकमिति यदिच्छुममात्मनः इ

अहंकारं मनो बुद्धिं रक्ष मे धर्मचारिणी प्राणापानौ तथा व्यानमुदानं च समानकं २४
यशः कीर्तिं च लक्ष्मीं च सदा रक्षतु चक्रिणी गोत्रमिंद्राणि मे रक्षेत् पशून्मे रक्ष चंडिका २५
पुत्रान् रक्षेन्महालक्ष्मीर्भार्यां रक्षतु भैरवी मार्गं क्षेमकरी रक्षेद्विजया सर्वतः स्थिता २६
रक्षाहीनं तु यत्स्थानं वर्जितं कवचेन तु तत्सर्वं रक्ष मे देवि जयंती पापनाशिनी २७ प
दमेकं न गच्छेत्तु यदीच्छेच्छुभमात्मनः कवचेनावृतो नित्यं यत्र यत्रैव गच्छति २८

च्छेत् तर्हि स पुरुषः कवचेन रहितमेकं पदमपि न गच्छेत् इति क्षणमात्रमपि देवीस्मरणं विना
न स्थापणीयमिति तात्पर्यं तदुक्तं पुराणेषु स्वपन्तिष्ठन् व्रजन् मार्गे प्रलपन् भोजने रतः कीर्तये
त्सततं देवी स वै मुच्येत बंधनादिति इत्युपदिश्य फलं कथयति कवचेनेति २८ ३८ ॥

दे॰क॰ १२

३९ ४० ४१ दैवीकलाविकला ४२ ४३ अभिचाराणिपरकृतानि ४४ कुलजादयोदुष्टदेवता।

जातिभेदाः औपदेशिकाः उप [illegible]

तत्रतत्रार्थलाभश्चविजयःसार्वकामिकः यंयंचिंतयतेकामंतंतंप्राप्नोतिनिश्चितं
३९ परमैश्वर्यमतुलंप्राप्स्यतेभूतलेपुमान् निर्भयोजायतेमर्त्यःसंग्रामेष्वपरा
जितः ४० त्रैलोक्येतुभवेत्पूज्यःकवचेनावृतःपुमान् इदंतुदेव्याःकवचंदेवाना
मपिदुर्लभं ४१ यःपठेत्प्रयतोनित्यंत्रिसंध्यंश्रद्धयान्वितः दैवीकलाभवेत्तस्यत्रैलो
क्येष्वपराजितः ४२ जीवेद्वर्षशतंसाग्रमपमृत्युविवर्जितः नश्यंतिव्याधयःसर्वे
लूताविस्फोटकादयः ४३ स्थावरंजंगमंचापिकृत्रिमंचापियद्विषं अभिचारा
णिसर्वाणिमंत्रयंत्राणिभूतले ४४ भूचराःखेचराश्चैवजलजाश्चोपदेशिकाः
सहजाःकुलजामालाडाकिनीशाकिनीतथा ४५ अंतरिक्षचराघोराडाकि
न्यश्चमहाबलाः ग्रहभूतपिशाचाश्चयक्षगंधर्वराक्षसाः ४६ ब्रह्मराक्षसवे
तालाःकूष्मांडाभैरवादयः नश्यंतिदर्शनात्तस्यकवचेहृदिसंस्थिते ४७

जातिभेदाः औपदेशिकाःउपदेशेनतन्मात्रेणयेसिध्यंतितेक्षुद्रदेवताभेदाःराक्षसःसकाशा १२

४८ अथ नाम सप्तशत्यंगत्वं कवचस्य विधत्ते जपेदिति पुत्राप्रथमतः पंचमइति अनंतनागो यावद्भूमंडलं
धत्ते धारयति तावदित्यर्थः परमं स्थानं मोक्षरूपं ज्ञानद्वारा प्राप्नोति नित्यं नियमेन महामायाएव
कारणमाया प्राबल्लब्रह्मरूपा तस्याः प्रसादतः ४९ ५० यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मावि

मानोन्नतिर्भवेद्राज्ञां तेजोवृद्धिकरं परं यशसा वर्धते सोपि कीर्तिमं
डितभूतले ४८ जपेत्सप्तशतीं चंडीं कृत्वा तु कवचं पुरा यावद्भूमं
डलं धत्ते सशैलवनकाननं ४९ तावत्तिष्ठति मेदिन्यां संततिः पु
त्रपौत्रिकी देहांते परमं स्थानं यत्सुरैरपि दुर्लभम् ५० प्राप्नो
ति पुरुषो नित्यं महामायाप्रसादतः ५१ इति देवीकवचं समा
प्तम् ॥ ॥

वृणुते तनूं स्वामिति श्रुतेः यया तां मायां प्राक्तिं वेदसम्पत्तं जयाति स पाप्मानं तरति सोऽमृ
तत्वं च गच्छतीश्रुतेः अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिरिति श्रुतेश्च पार्वतीप
रमाविद्या ब्रह्मविद्याप्रदायिनी विशेषेणैव जंतूनां नानासंदेहकारणमिति स्मृतेश्च हितो ऽके

श्री कवचेऽस्मिन्सार्धपंचाशत्संख्यश्लोकसंग्रहः ५१

दे॰ क॰ आधिक्यन्यूनतादोषपरिहारचिकीर्षया देवीनाम्नां क्रमस्यापि कथनं क्रियते मया तेषु सप्तो-
१२ काः प्राचीनग्रन्थस्थाः सांप्रदायिका एव लिख्यन्ते दक्षा दिग्पालदेव्यश्च चामुण्डा च ततः परं ज-
या च विजया चैवाप्यजिता चापराजिता १ उद्योतिनी ततश्चामामालाधरी यशस्विनी त्रि-
13 नेत्रा यमघण्टा च धूम्राविनी हारवासिनी २ कालिका प्रेतकारी पश्चात्सिंगंधा चर्चिका तथा
अम्बता टिकला पश्चात् ततः स्यान्महासरस्वती ३ कौमारी चण्डिका चित्रघण्टा मायामहादिका
कामाख्यानन्तरं स्वं मंगला भद्रकालिका ४ पर्णशबरी नीलग्रीवा ततः स्यान्नलकूबरी ए-
कपाशिनिका पश्चाद्वज्रधारिण्यनन्तरम् ५ दंडिनी चांबिका शूलेशानी स्यान्नवलेश्वरी
मनः प्रोक्ता विनाशनस्याल्ललिता शूलधारिणी ६ कामिनी गुह्यसुन्दरी स्यादीश्वरी च ततः
परं भूतनाथा ततः स्याच्च महामहिषवादिनी ७ भगवत्यपि विश्वस्था महाश्रीबाला
तथा विनायकी नारसिंही ततः पश्चादमितौजसी ८ श्रीधर्मिणी च पातालवासिन्यत्ते
कपालिनी ऊर्ध्वकेशी च कौबेरी वागीश्वरी पार्वती तथा ९ कालरात्रिश्च मकुटेशानी पा-
द्मावती तथा चूडामणिस्तथा ज्वाला महाप्रभेया ततः स्मृता १० गुणा ऐन्द्र्यपर्णा स्या-
दीश्वरी धर्मचारिणी चक्रिणी दण्डचण्डी महालक्ष्मीश्च भैरवी ११ हेमशंकरी पश्चाद्विज-
या च जयन्तिका इत्येताः सम्पूर्णाख्याताः कवचस्याश्च शक्तयः १२ इति श्रीशैवोपनामकरा- १२
ममहस्तलक्ष्मीगर्भजनीलकण्ठभट्टकृतं सम्मात्म्याकवचविवरणं समाप्तिमगमत् ॥ ॥



दु॰ स॰ अथार्गलाव्याख्यानं तत्रप्रथमतो देवताया उद्देश्यरूपाया गुणान् ध्यानोपयोगीनाह जयंतीति
१४ जयंती सर्वोत्कृष्टेत्यर्थः गुणत्रयसाम्यावस्थोपाधिकब्रह्मरूपिण्या भगवत्याः सर्वकारणता
त् मंगला मंगं जननमरणादिरूपं सर्पणं भक्तानां लाति गृह्णाति नाशयति सा मोक्षप्रदा मंग
लेष्वपि न तस्य प्राणा उत्क्रामंतीति श्रुतेः काली कलयति भक्षयति सर्वमेतत्प्रलयकाले इ
ति काली ब्रह्मक्षत्रे चोभे भवत ओदनः मृत्युर्यस्योपसेचनमिति श्रुतेः भद्रकाली भद्रं मंगलं सु

मार्कण्डेय उवाच जयंती मंगला काली
भद्रकाली कपालिनी

खं कलयति स्वीकरोति भक्तेभ्यो दातुमिति भद्रकाली भद्रकाली सुखप्रदेति रहस्यागमे
ऽर्थकथनात् कपालिनी कपालोऽस्त्री शिरोऽस्थि स्यात् घटादेः शकले व्रजे इति मेदिनीको
षात् ब्रह्मादीन् निहत्य तेषां कपालं गृहीत्वा प्रलयकाले अटतीति प्रपंचरूपा व्रजे हस्ते १४
यस्या इति वा कपालिनी मत्वर्थीय इनिः प्रपंचो व्रजहस्ता वा कपालिन्युच्यते परेति रहस्या

दुर्गाद्दुःखेनाष्टांगयोगसर्वकर्मोपासनारूपेणक्लेशेन गम्यते प्राप्यते सा दुर्गा तां दुर्गां दुर्गमां
देवीमिति देव्यथर्वशिरसः क्षमा भक्तानामन्येषां वा सर्वानपराधान् क्षमते सहते जननीत्वा
त्सातिशयकारुण्यवती क्षमेत्युच्यते शिवा चिद्रूपिणी तस्याः चित्ता प्राप्यमायायाः।
प्रकाशाकारे हि जो नमः अनुप्रतिष्ठायां संविन्निर्विकल्पा स्वयंप्रभा सदाकारा सदा संसारो

दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते १

च्छेदकारिणी सा शिवा परमा देवी शिवाभिन्ना शिवंकरी निरुक्तसंहितोक्तेः धात्री सर्वप्र
पंचधारणकर्त्री अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः अहं मित्रावरुणौ।
भाविभर्म्यहमिंद्राग्नी अहमश्विनौ भेत्यादिश्रुतेः स्वाहा देवपोषिणी स्वधा पितृपोषि
णी १ श्रीरामजी ॥ १ ॥ श्री १ ॥ १

दे० स्तु० एताहृष्टाएवोक्तिमहामायागुणवतीयातमसितनस्तितस्मैनमोनमस्कारएवास्तुकेवलेनतन्नाह
१५ भूपाःपरिचर्यायांसामर्थ्यमस्तीतिभावः १ मधुकैटभयोर्विद्राविणीनाशिनीचसाविधात्रु
वरदाचेत्यर्थः मधुकैटभनाशनधौम्रलोचनाश्चताभसतीतस्मैवरदेददाविति कथादेवीभागवते
प्रथमस्कंधेप्रसिद्धा रूपंरूपतेज्ञायतेइतिरूपंपरमात्मवस्तुरूपंभवेदिंडुरमंदकोतिरि।
मागमानहेद्विमएनंमल्कृतनमस्कारेणैवप्रसन्नासतीतयाजयेजयत्यनेनपरमात्मनःस्वरू

मधुकैटभविद्राविविधात्रुवरदेनमः रूपंदेहिजयंदेहियशोदेहिद्विषोजहि २
महिषासुरनिर्नाशविधात्रीवरदेनमः रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ३
वंदितांघ्रियुगेदेविदेविसौभाग्यदायिनि रूपंदेहिजयंदेहियशोदेहिद्विषोजहि ४

पमितिजयोवेदस्यस्तिराशिः ततोजयमुदीरयेदित्यत्रप्रसिद्धंस्तंदेहियशोदेहिसहस्रनोयप्रा
इतिश्रुतिप्रसिद्धंतत्वज्ञानसंपादनजन्यंयशःप्राप्नुहेद्विषोहिषोजहिकामक्रोधादीन्शत्रून्जहि
नाशय २ महिषासुरेति महिषासुरस्यनिर्नाशस्यविधात्रीकर्त्रीत्यर्थः वरदेइतिपूर्व
रूपदं ३ वंदितेति ब्रह्मविष्ण्वादिभिर्वंदितमंघ्रियुगंयस्यास्तेषामेतदपेक्षयास्तुनोपाधि १५